# tattvAryAstavaH Hymn on Lord Nataraja at Chidambaram

શિવકામસુન્દરીશં શિવગઙ્ગાતીરકલ્પિતનિવેશમ .
શિવમાશ્રયે દ્યુકેશં શિવમિચ્છન્મા વપુષ્યભિનિવેશમ .. ૧..
ગીર્વાણચક્રવર્તી ગીશ્ચેતોમાર્ગદૂરતોવર્તી .
ભક્તાશયાનુવર્તી ભવતુ નટેશોઽખિલામયનિવર્તી .. ૨..
વૈયાઘ્રપાદભાગ્યં વૈયાઘ્રં ચર્મ કંચન વસાનમ .
વૈયાકરણફણીડ્યં વૈયાસિક્યા ગિરા સ્તુતં પ્રણુમઃ .. ૩..
હાટકસભાનિવાસઃ શાટકતાપન્નસકલહરિદન્તઃ .
ઘોટકનિગમો માયાનાટકસાક્ષી જગત્પતિર્જયતિ .. ૪..
શૈલૂષરાજમાદ્યં માલૂરપ્રસવમાલિકાભરણમ .
પીલૂપમોઽન્ધુજીર્યચ્છાલૂરાભઃ કથં વિજાનીયામ .. ૫..
કનકસભૈકનિકેતં કઠિનપુરાણોક્તિસારસંકેતમ .
નારાધયન્તિ કે તં નારાયણ્યા યુતં સ્વતોકેતમ .. ૬..
તિલ્લવને ક્ષુલ્લવને પલ્લવસંભિન્નફુલ્લપુષ્પઘને .
ચિલ્લહરીમુલ્લલયન વલ્લભયા ભિલ્લતલ્લજો નટતિ .. ૭..
વૈરાજહૃત્સરોજે વૈરાજાદ્યૈઃ સ સામભિઃ સ્તવ્યઃ .
વૈરાગ્યાદિગુણાઢ્યૈઃ વૈરાદ્યુત્સૃજ્ય દૃશ્યતે નૃત્યન .. ૮..
ઢક્કાનિનદૈઃ સૂત્રાણ્યઙ્ગદનાદૈરહો મહદ્ભાષ્યમ .
વ્યાકરણસ્ય વિવૃણ્વન નૃત્યતિ ભૃત્યાન કૃતાર્થયન મર્ત્યાન .. ૯..
નટનાયક નટનાય ક ઇહ સુકૃતી નો તવ સ્પૃહયેત .
મન જુલતામજુલતામહિતે વસ્તું ચ તિલ્લવને .. ૧૦..
અતિદુરિતોત્તારકૃતે ચિરધૃતહર્ષઃ સભાપતિઃ સદ્યઃ .
અગણેયાઘઘનં મામાસાદ્યાનન્દમેદુરો નટતિ .. ૧૧..
મત્પાદલગ્નજનતામુદ્ધર્તાસ્મીતિ ચિત્સભાનાથઃ .
તાણ્ડવમિષોદ્ધૃતૈકસવાઙ્ઘ્રિઃ સર્વાન વિબોધયતિ .. ૧૨..

આપન્નલોકપાલિનિ કપાલિનિ સ્ત્રીકૃતાઙ્ગપાલિનિ મે .
શમિતવિધિશ્રીશરણે શરણા ધીરસ્તુ ચિત્સભાશરણે .. ૧૩..
ભિક્ષુર્મહેશ્વરોઽપિ શ્રુત્યા પ્રોક્તઃ શિવોઽપ્યુગ્રઃ .
અપિ ભવહારી ચ ભવો નટોઽપિ ચિત્રં સભાનાથઃ .. ૧૪..
નૃત્યન્નટેશમૌલિત્વઙ્ગદ્ગઙ્ગાતરઙ્ગશીકરિણઃ .
ભૂષાહિપીતશિષ્ટાઃ પુનન્તુ માં તિલ્લવનવાતાઃ .. ૧૫..
કનકસભાસમ્રાજો નટનારમ્ભે ઝલંઝલંઝલિતિ .
મઞ્જીરમઞ્જુનિનદા ધ્વનિયુઃ શ્રોત્રે કદા નુ મમ .. ૧૬..
પર્વતરાજતનૂજાકુચતટસંક્રાન્તકુઙ્કુમોન્મિશ્રાઃ .
નટનાર્ભટીવિધૂતા ભૂતિકણાસ્તે સ્પૃશેયુરપિ મેઽઙ્ગમ .. ૧૭..
નટનોચ્ચલત્કપાલામર્દિતચન્દ્રક્ષરત્સુધામિલિતાઃ .
આદિનટમૌલિતટિનીપૃષતો ગોત્રેઽત્ર મે સ્ખલેયુઃ કિમ .. ૧૮..
પશ્યાનિ સભાધીશં કદા નુ તં મૂર્ધનિ સભાધીશમ .
યઃ ક્ષયરસિકં કાલં જિતવાન ધત્તે ચ શિરસિ કઙ્કાલમ .. ૧૯..
તનુજાયાતનુજાયાસક્તાનાં દુર્લભં સભાનાથમ .
નગતનયા નગતનયા વશયતિ દત્ત્વા શરીરાર્ધમ .. ૨૦..
આનન્દતાણ્ડવં યસ્તવેશ પશ્યેન્ન ચાપિ નૃગણે યઃ .
સ ચ સ ચ ન ચન્દ્રમૌલે વિદ્વદ્ભિર્જન્મવત્સુ વિગણેયઃ .. ૨૧..
કામપરવશં કૃત્વા કામપરવશં ત્વકૃત્વા મામ .
કનકસભાં ગમયસિ રે કનકસભાં હા ન યાપયસિ .. ૨૨..
નટનં વિહાય શંભોર્ઘટનં પીનસ્તનીભિરાશાસ્સે .
અટનં ભવે દુરન્તે વિટ નન્દસિ ન સ્વભૂમસુખમ .. ૨૩..
કલિતભવલઙ્ઘનાનાં કિં કરૈવ ચિત્સુખઘનાનામ .
સુમુદાં સાપઘનાનાં શિવકામેશ્યાઃ કૃપામૃતઘનાનામ .. ૨૪..
નિનિલીયે માયાયાં ન વિલિયે વા શુચા પરં લીયે .
આનન્દસીમનિ લસત્તિલ્લવનીધામનિ સ્વભૂમનિ તુ .. ૨૫..

અધિહેમસભં પ્રસભં બિસભઙ્ગવદાન્યધન્યરુચમ .
શ્રુતગલગરલં સરલં નિરતં ભક્તાવને ભજે દેવમ .. ૨૬..
સભયા ચિત્સભયાસીન્માયા માયાપ્રબોધશીતરુચેઃ .
સુહિતા ધીઃ સુહિતા મે સોમા સોમાર્ધધારિણી મૂર્તિઃ .. ૨૭..
પત્યા હેમસભાયાઃ સત્યાનન્દૈકચિદ્વપુષા .
કત્યાર્તા ન ત્રાતા નૃત્યાયત્તેન માદૃશા મર્ત્યાઃ .. ૨૮..
ભજતાં મુમુક્ષયા ત્વાં નટેશ લભયાસ્ત્રયઃ પુમર્થાશ્ચ .
ફલલિપ્સયામ્રભાજાં છાયાસૌરભ્યમાધવ્ય ઇવ .. ૨૯..
કચુકપચકનદ્ધં નટયસિ માં કિં નટેશ નાટયસિ .
નટસિ નિરાવૃતિસુખિતો જહિ માયાં ત્વાદૃશોઽહમપિ તત સ્યામ .. ૩૦..
આસ્તાં નટેશ તથૈન્નટતિ ભવાનમ્બરે નિરાલમ્બે .
ત્વન્નટનેઽપિ હિ નટનં વેદપુરાનાગમાઃ સમાદધતિ .. ૩૧..
વેધસિ સર્વાધીશેઽમેધસિ વા માદૃશે સરૂપકૃતા .
રોધસિ શિવગઙ્ગાયા બોધસિરા કાચિદુલ્લસતિ .. ૩૨..
હટ્ટાયિતં વિમુક્તેઃ કુટ્ટાકં તં ભજામિ માયાયાઃ .
ભટ્ટારકં સભાયાઃ કિટ્ટાત્મન્યઙ્ગકે ત્યજન્મમતામ .. ૩૩..
શ્રીમચ્ચિદમ્બરેશાદન્યત્રાનન્દતાણ્ડવાસક્તાત .
બ્રાહ્મં લક્ષણમાસ્તે કુત્રચિદાનન્દરૂપતા દેવે .. ૩૪..
ક્ષુલ્લકકામકૃતેઽપિ ત્વત્સેવા સ્યાદ્વિમુક્તિમપિ દાત્રી .
પીતામૃતોઽપ્યુદન્યાશાન્ત્યૈ સ્યાચ્ચિત્સભાધિપામર્ત્યઃ .. ૩૫..
સત્યં સત્યં ગત્યન્તરમુત્સૃજ્ય તે પદાપાત્યમ .
અત્યન્તાર્તં ભૃત્યં ન ત્યજ નિત્યં નટેશ માં પાહિ .. ૩૬..
ષટ્ત્રિંશતા તત્ત્વમયીભિરાભિઃ સોપાનભૂતાભિરુમાસહાયમ .
આર્યાભિરાદ્યં પરતત્ત્વભૂતં ચિદમ્બરાનન્દનટં ભજધ્વમ .. ૩૭..
.. ઇતિ શ્રીતત્ત્વાર્યાસ્તવઃ સંપૂર્ણઃ..